# muktikA upaniShad excerpts

# મુક્તિકા ઉપનિષત્

## Document Information

Text title : Muktika Upanishad Excerpts

File name : muktikaa.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 108 / 108; Shukla Yajurveda - Samanya upanishad

Latest update : January 2, 1998

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# મુક્તિકા ઉપનિષત્

Excerpts from MUKTIKAA UPANISHHAD

॥ મુક્તિકા ઉપનિષત્ ॥

ઋગ્વેદસ્ય તુ શાખાઃ સ્યુરેકવિંશતિસંખ્યકાઃ ।
નવાધિકશતં શાખા યજુશો મારુતાત્મજ ॥

સહસ્રસંખ્યયા જાતાઃ શાખાઃ સામ્નઃ પરંતપ ।
અથર્વણસ્ય શાખાઃ સ્યુઃ પંચાશદ્ભેદતો હરે ॥

એકૈકસ્યાસ્તુ શાખાયા એકૈકોપનિષન્મતા ।
તાસામેકામૃચં યશ્ચ પઠતે ભક્તિતો મયિ ॥

સ મત્સાયુજ્યપદવીં પ્રાપ્નોતિ મુનિદુર્લભામ્ ।

ઇયં કૈવલ્યમુક્તિસ્તુ કેનોપાયેન સિદ્ધ્યતિ ।
માંડૂક્યમેકમેવાલં મુમુક્ષૂણાં વિમુક્તયે ॥

તથાપ્યસિદ્ધં ચેજ્જ્ઞાનં દશોપનિષદં પઠ ।
જ્ઞાનં લબ્ધ્વા ચિરાદેવ મામકં ધામ યાસ્યસિ ॥

તથાપિ દૃઢતા નો ચેદ્વિજ્ઞાનસ્યાઞ્જનાસુત ।
દ્વાત્રિંશાખ્યોપનિષદં સમભ્યસ્ય નિવર્તય ॥

વિદેહમુક્તાવિચ્છા ચેદોષ્ટરશતં પઠ ।
તાસં ક્રમં સશાંતિં ચ શ્રુણુ વક્ષ્યામિ તત્ત્વતઃ ॥

ઈશકેનકઠપ્રશ્નમુંડમાંડૂક્યતિત્તિરિઃ ।
ઐતરેયં ચ છાંદોગ્યં બૃહદારણ્યકં તથા ॥

બ્રહ્મકૈવલ્યજાબાલશ્વેતાશ્વો હંસ આરુણિઃ ।
ગર્ભો નારાયણો હંસો બિન્દુર્નાદશિરઃ શિખા ॥

મૈત્રાયણી કૌષીતકી બૃહજ્જાબાલતાપની ।

કાલાગ્નિરુદ્રમૈત્રેયી સુબાલક્ષુરિમન્ત્રિકા ॥

સર્વસારં નિરાલંબં રહસ્યં વજ્રસૂચિકમ્ ।
તેજોનાદધ્યાનવિદ્યાયોગતત્ત્વાત્મબોધકમ્ ॥

પરિવ્રાટ્ ત્રિશિખિ સીતા ચૂડા નિર્વાણમંડલમ્ ।
દક્ષિણા શરભં સ્કંદં મહાનારાયણાવ્હયમ્ ॥

રહસ્યં રામતપનં વાસુદેવં ચ મુદ્ગલમ્ ।
શાંડિલ્યં પૈંગલં ભિક્ષુમહચ્છારીરકં શિખા ॥

તુરીયાતીતસંન્યાસપરિવ્રાજાક્ષમાલિકા ।
અવ્યક્તૈકાક્ષરં પૂર્ણા સૂર્યાક્ષ્યધ્યાત્મકુંડિકા ॥

સાવિત્ર્યાત્મા પાશુપતં પરં બ્રહ્માવધૂતકમ્ ।
ત્રિપુરાતપનં દેવીત્રિપુરા કઠભાવના ॥

હૃદયં કુંડલી ભસ્મ રુદ્રાક્ષગણદર્શનમ્ ॥

તારસારમહાવાક્યપંચબ્રહ્માગ્નિહોત્રકમ્ ।
ગોપાલતપનં કૃષ્ણં યાજ્ઞવલ્ક્યં વરાહકમ્ ॥

શાટ્યાયનિ હયગ્રીવં દત્તાત્રેયં ચ ગારુડમ્ ।
કલિજાબાલિસૌભાગ્યરહસ્યઋચમુક્તિકા ॥

એવમષ્ટોત્તરશતં ભાવનાત્રયનાશનમ્ ।
જ્ઞાનવૈરાગ્યદં પુંસાં વાસનાત્રયનાશનમ્ ॥

ગૃહીત્વાષ્ટોત્તરશતં યે પઠંતિ દ્વિજોત્તમાઃ ।
પ્રારબ્ધક્ષયપર્યંતં જીવન્મુક્તા ભવંતિ તે ॥

ઐતરેયકૌષિતકીનાદબિંદ્વાત્મપ્રબોધનિર્વાણમુદ્ગલાક્ષમાલિકાત્રિપુરાસૌભાગ્ય-
બહ્વૃચાનામૃગ્વેદગતાનાં દશસંખ્યાકાનામુપનિષદાં વાઙ્મે મનસીતિ શાંતિઃ ॥

ઈશાવાસ્યબૃહદારણ્યજબાલહંસપરમહંસસુબાલમન્ત્રિકાનિરાલંબત્રિશિખીબ્રાહ્મણમંડલબ્રાહ્મ-
ણાદ્વયતારકપૈંગલભિક્ષુતુરીયાતીતાધ્યાત્મતારસારયાજ્ઞવલ્ક્યશાટ્યાયનીમુક્તિકાનાં
શુક્લયજુર્વેદગતાનામેકોનવિંશતિસંખ્યાકાનામુપનિષદાં પૂર્ણમદ ઇતિ શાંતિઃ ॥

કઠવલ્લીતૈત્તિરીયકબ્રહ્મકૈવલ્યશ્વેતાશ્વતરગર્ભનારાયણામૃતબિંદ્વમૃતનાદકાલાગ્નિરુદ્રક્ષુરિકા-
સર્વસારશુકરહસ્યતેજોબિંદુધ્યાનબિંદુબ્રહ્મવિદ્યાયોગતત્ત્વદક્ષિણામૂર્તિસ્કંદશારીરક-
યોગશિખૈકાક્ષરાક્ષ્યવધૂતકઠરુદ્રહૃદયયોગકુંડલિનીપંચબ્રહ્મપ્રાણાગ્નિહોત્રવરાહકલિસંતરણ-

સરસ્વતીરહસ્યાનાં કૃષ્ણયજુર્વેદગતાનાં દ્વાત્રિંશત્સંખ્યાકાનામુપનિષદાં સહ નાવવત્વિતિ શાંતિઃ ॥

કેનચ્છાંદોગ્યારુણિમૈત્રાયણિમૈત્રેયીવજ્રસૂચિકાયોગચૂડામણિવાસુદેવમહત્સંન્યાસાવ્યક્તકુંડિકા-
સાવિત્રીરુદ્રાક્ષજાબાલદર્શનજાબાલીનાં સામવેદગતાનાં ષોડશસંખ્યાકાનામુપનિષદામાપ્યાયંત્વિતિ શાંતિઃ ॥

પ્રશ્નમુંડકમાંડુક્યાથર્વશિરોઽથર્વશિખાબૃહજ્જાબાલનૃસિંહતાપનીનારદપરિવ્રાજકસીતાશરભ-
મહાનારાયણરામરહસ્યરામતાપનીશાંડિલ્યપરમહંસપરિવ્રાજકાન્નપૂર્ણાસૂર્યાત્મપાશુપત-
પરબ્રહ્મત્રિપુરાતપનદેવીભાવનાબ્રહ્મજાબાલગણપતિમહાવાક્યગોપાલતપનકૃષ્ણહયગ્રીવ-
દત્તાત્રેયગારુડાનામથર્વવેદગતાનામેકત્રિંશત્સંખ્યાકાનામુપનિષદાં ભદ્રં કર્ણેભિરિતિ શાંતિઃ ॥

Please send corrections to Sunder Hattangadi; Last updated ṭoday

---

*muktikA upaniShad excerpts*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*